Register Number:

Date:

**ST. JOSEPH'S COLLEGE (AUTONOMOUS), BANGALORE-27**

**B.A. B.SC. B.com. SANSKRIT - I SEMESTER**

**SEMESTER EXAMINATION: October 2019**

**118 -SANSKRIT**

**Time- 2 1/2 hrs** **Max Marks-70**

**I. दशानाम् एकवाक्येन संस्कृतभाषया उत्तरं लिखत।** 10×1=10

अ) दर्शनं नाम किम्?

आ) उपनिषत् पदस्य व्युत्पत्तिं लिखत?

इ) उत्तररामचरितं नाटकं केन रचितम्?

ई) पुरुषार्थाः के?

उ) बुद्धस्य शासनत्रयं किम्?

ऊ) महाभारते कति श्लोकाः सन्ति?

ऋ) प्रत्येकस्मिन् वेदे कति विभागाः सन्ति?

ॠ) चम्पू लक्षणं किम्?

लृ) अष्टादश पुराणानि केन लिखितानि इति प्रतीतिरस्ति?

ए) चन्द्रगुप्तस्य मन्त्री कः?

ऐ) बौद्धमतस्य प्रवर्तकः कः?

ओ) नकुलस्य मुखं कथं आसीत्?

**II. संयोज्य लिखत** 6×1=6

| | |
|---|---|
| 2. सुग्रीवः | विश्वनाथः |
| केनोपनिषत् | गौतमः |
| साहित्यदर्पणम् | सामवेदः |
| अष्टाध्यायी | सौहार्दभावः |
| व्याससूत्रम् | भातृवात्सल्यम् |
| भरतस्य | पाणिनिः |

**III. प्रदत्तानां षण्णामेव वाक्यानाम् अर्थं लिखत।** 6×2=12

3. सत्यं धर्मश्चैतानि मा माहासिषुः।
4. अतः श्वः करणीयानि कुर्यादद्यैव बुद्धिमान्।
5. विकारहेतौ सति विक्रियान्ते येषां न चेतांसि त एव धीराः।
6. चित्तेवाचि क्रियायां च महतामेकरूपता।
7. अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति।
8. स तु भवति दरिद्रो यस्य तृष्णा विशाला।
9. त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।

IV. श्लोकयोः तात्पर्यं लिखत 3×2=6

10. वृक्षाग्रवासी न च पक्षिराजः त्रिनेत्रधरी न च शूलपाणिः।
    त्वग्वस्त्रधारी न च सिद्धयोगी जलं च बिभ्रन्न घटो न मेघः॥
11. उपकारिषु यः साधुः साधुत्वे तस्य को गुणः।
    अपकारिषु यः साधुः स साधुरिति कीर्तितः॥
12. सीमन्तिनीषु का शान्ता? राजा कोऽभूत् गुणोत्तमः?
    विदुषां का सदा वन्द्या? अत्रैवोक्तं न बुध्यते ॥

V. **वेधस्, सर्वा, गुरु एतेषु एकस्य शब्दरूपाणि लिखत।** 6

VI. **सविस्तारेण लिखत।** 2×10=20

13.. संस्कृतभाषायाः वैशिष्ट्यं लिखत।

14. भासकवेः नाटकानि अधिकृत्य लिखत।

15. मृच्छकटिकम् अधिकृत्य लिखत ।

VII. **अनुच्छेदं पठित्वा उत्तरत** 5×2=10

किञ्चन गुरुकुलम्। तत्र बहवः विद्यार्थिनः पठन्ति। विद्याभ्यासं समाप्य निर्गमनसमये ते गुरुं पृच्छन्ति स्म – "आचार्य, गुरुदक्षिणारूपेण किं देयम्?" इति

गुरुः वदति स्म – "यत् अधीतं तस्य सम्यक् अनुष्ठानं क्रियताम्। स्वावलम्बितया जीवनं कृत्वा वर्षाभ्यन्तरे यत् सम्पाद्येते तत्र कश्चन भागः दीयताम्" इति।

विद्यार्थिनः गृहं प्रतिगत्य वर्षाभ्यन्तरे यथाशक्ति धनं सम्पाद्य तत्र कश्चित् भागं गुरवे श्रद्धया समर्पयन्ति स्म। कदाचित् कश्चन तेजस्वी बालः गुरुकुलम् आगतवान्। तीक्ष्णमतिः सः अल्पे एव काले गुरोः प्रियः अभवत्। गुरुः अपि तं वात्सल्येन अपाठयत्।

विद्याभ्यासं परिसमाप्य प्रतिगमनसमये अन्ये शिष्याः इव सः अपि गुरुम् अपृच्छत् – "आचार्यवर्य!

गुरुदक्षिणात्वेन मया किं देयम्!" गुरु यथापूर्वम् उत्तरम् अयच्छत्। शिष्यः ततः निर्गतः। ततः वर्षाभ्यन्तरे दशभिः सह प्रत्यागरत्य सः गुरुम् अवदत् – "आचार्यवर्य! मया गुरुदक्षिणां दातव्या" इति। "महतः सन्तोषेस्य विषयः" गुरुः अवदत्। एते एव गुरुदक्षिणात्वेन अर्प्यन्ते मया - शिष्यः अवदत्। किमर्थं तथा? गुरुः आश्चर्येण अपृच्छत्। गुरुवर्य! भवता यत् अध्यापितं तत् यथाशक्ति अध्यापितं मया। तस्मात् एते भवच्छिष्यार्हतां गताः सन्ति। इतः परं भवान् एतान् अध्याप्य सन्मार्गगामिनः कुर्यात् इति प्रार्थये इति विनयेन नमस्कृत्य अवदत् शिष्यः।

तं साभिमानं पश्यन् गुरुः अवदत् – साधु शिष्योत्तम साधु! भवता सर्वश्रेष्ठा एव गुरुदक्षिणा अर्पिता। यत् मया अध्यापितं तत् सम्यक् अवगत्य योग्येन एव क्रमेण तस्य आचरणमपि त्वया कृतम्। तव आचरणम् अपि सर्वश्रेष्ठम्। अतः एव त्वमपि मम शिष्येषु सर्वश्रेष्ठः इति।

16. प्रश्नाः -

क. शिष्यः विनयेन किम् प्रार्थितवान्?

ख. गुरुः शिष्यस्य आचरणं सर्वश्रेष्ठम् इति किमर्थम् उक्तवन्?

ग. गुरुः गुरुदक्षिणारूपेण किम् स्वीकरोति स्म?

घ. कृत्प्रत्ययान्तपदद्वयं लिखतज़्?

ङ. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत?